2026

UGSVDS401
उपनिषत्साहित्यम् १

Full Marks : 60

Time : $2\frac{1}{2}$ Hours

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - **1×10=10**

1. नास्तिकदर्शनानि कति सन्ति?
2. न्यायदर्शनस्य प्रवर्तकः कः?
3. 'उपनिषत्' इति शब्दस्य का व्युत्पत्तिः?
4. विद्धया किम् अश्नुते?
5. केनोपनिषदि कति खण्डानि सन्ति ?
6. 'यक्षोपाख्यानम्' कुत्रोपलभ्यते ?
7. तैत्तिरीयोपनिषदि कति वल्लयो भवन्ति ?
8. 'अथ शीक्षां व्याख्यास्यामः' इति वाक्यांशः कस्यामुपनिषदि उपलभ्यते ?
9. 'केनेषितं पतति प्रेषितं मनः' इति मन्त्रेण का उपनिषत् प्रारभ्यते?
10. ईशावास्योपनिषद् शुक्लयजुर्वेदस्य कस्मिन्नध्याये समुपलभ्यते?

अधोलिखितेषु केषाञ्चित् पञ्चानां यथानिर्देशं समाधेयम्- 6×5=30

11. योगदर्शनम् - टिप्पणी प्रदेया।
12. असूर्या नाम ते लोका अन्धेन तमसावृताः।
    तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥ - व्याख्यायताम्।
13. अन्यदेव तद्विदितादथो अविदितादधि।
    इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे॥ - व्याख्यायताम्।
14. अथातः संहिताया उपनिषदं व्याख्यास्यामः। - व्याख्यायताम्।
15. विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
    अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥ - व्याख्यायताम्।
16. प्रतिवोधविदितं मतममृतत्वं हि विन्दते।
    आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥ - व्याख्यायताम्।
17. तैत्तिरीयोपनिषद् - टिप्पणी प्रदेया।

अधस्तनेषु द्वौ प्रश्नौ समाधेयौ **10×2=20**

18. आस्तिकदर्शनानां संक्षिप्तं परिचयमुपस्थाप्यताम्|
19. ईशावास्योपनिषदः प्रतिपाद्यविषयो समुपवर्ण्यताम्|
20. केनोपनिषदानुसारम् आत्माविषयकवर्णनमुपस्थापयत।
21. तैत्तिरीयोपनिषदः शीक्षावल्ल्याः सारांशो प्रतिपाद्यताम्।

****